# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## ॥अथ पञ्चम काण्डे तृतीयः प्रश्नः॥

हरिः ओम्॥ उथ्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न यद्वै यज्ञस्य क्रियमाणस्याऽन्तर्यन्ति पूयति वा अस्य तदाश्विनीरुप दधात्यश्विनौ वै देवानां भिषजौ ताभ्यामेवाऽस्मै भेषजं करोति पञ्चोप दधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मै भेषजं करोत्यृतव्या उप दधात्यृतूनां क्लुप्त्यै [१] पञ्चोप दधाति पञ्च वा ऋतवो यावन्त एवर्तवस्तान्कल्पयति समानप्रभृतयो भवन्ति समानोदर्कास्तस्माथ्समाना ऋतव एकेन पदेन व्यावर्तन्ते तस्मादृतवो व्यावर्तन्ते प्राणभृत उप दधात्यृतुष्वेव प्राणान्दधाति तस्माथ्समानाः सन्त ऋतवो न जीर्यन्त्यथो प्र जनयत्येवैनानेष वै वायुर्यत्प्राणो यदृतव्या उपधाय प्राणभृत [२] उपदधाति तस्माथ्सर्वानृतूननु वायुरा वरीवर्ति वृष्टिसनीरुप दधाति वृष्टिमेवाऽव रुन्धे यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारग्ं सादयति तस्माथ्सर्वानृतून् वर्षति यत्प्राणभृत उपधाय वृष्टिसनीरुपदधाति तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते पशवो वै वयस्या नानामनसः खलु वै पशवो नानाव्रतास्तेऽप एवाऽभि समनसो [३] यं कामयेताऽपशुः स्यादिति वयस्यास्तस्योपधायाऽपस्या उप दध्यादसंज्ञानमेवाऽस्मै पशुभिः करोत्यपशुरेव भवति यं कामयेत पशुमान्थ्स्यादित्यपस्यास्तस्योपधाय वयस्या उप दध्याथ्संज्ञानमेवाऽस्मै पशुभिः करोति पशुमानेव भवति चतस्रः पुरस्तादुप दधाति तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे [४]

मूर्धन्वतीर्भवन्ति तस्मात्पुरस्तान्मूर्धा पञ्च दक्षिणायाग्ं श्रोण्यामुप दधाति पञ्चोत्तरस्यां तस्मात्पश्चाद्वर्षीयान्पुरस्तात्प्रवणः पशुर्बस्तो वय इति दक्षिणेऽग्ंस उप दधाति वृष्णिर्वय इत्युत्तरेऽग्ंसावेव प्रति दधाति व्याघ्रो वय इति दक्षिणे पक्ष उप दधाति सिग्ंहो वय इत्युत्तरे पक्षयोरेव वीर्यं दधाति पुरुषो वय इति मध्ये तस्मात्पुरुषः पशूनामधिपतिः॥[५]

*क्लुप्त्या उपधाय प्राणभृतः समनसः कृष्णो पुरुषो वय इति पञ्च च॥**5.3.1**॥*

इन्द्राग्नी अव्यथमानामिति स्वयमातृण्णामुप दधातीन्द्राग्निभ्यां वा इमौ लोकौ विधृतावनयोर्लोकयोर्विधृत्या अधृतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषेन्द्राग्नी इत्याहेन्द्राग्नी वै देवानामोजोभृतावोजसैवैनामन्तरिक्षे चिनुते धृत्यै स्वयमातृण्णामुप दधात्यन्तरिक्षं वै स्वयमातृण्णान्तरिक्षमेवोप धत्तेऽश्वमुप [६] घ्रापयति प्राणमेवाऽस्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाऽग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुथ्सृष्ट्या अथो सुवर्गस्य लोकस्याऽनुख्यात्यै देवानां वै सुवर्गं लोकं यतां दिशः समव्लीयन्त त एता दिश्या अपश्यन्ता उपाऽदधत ताभिर्वै ते दिशोऽदृग्ंहन् यद्दिश्या उपदधाति दिशां विधृत्यै दश प्राणभृतः पुरस्तादुप [७] दधाति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव पुरस्ताद्धत्ते तस्मात्पुरस्तात्प्राणा ज्योतिष्मतीमुत्तमामुप दधाति तस्मात्प्राणानां वाग्ज्योतिरुत्तमा दशोप दधाति दशाक्षरा विराड्विराट्छन्दसां ज्योतिर्ज्योतिरेव पुरस्ताद्धत्ते तस्मात्पुरस्ताज्ज्योतिरुपाऽऽस्महे छन्दाग्ंसि पशुष्वाजिमयुस्तान्बृहत्युदजयत्तस्माद्बार्हताः [८] पशव उच्यन्ते मा छन्द इति दक्षिणत उप दधाति तस्माद्दक्षिणावृतो मासाः पृथिवी छन्द इति पश्चात्प्रतिष्ठित्या

अग्निर्देवतेत्युत्तरत ओजो वा अग्निरोज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति षट्त्रिग्ंशथ्सं पद्यन्ते षट्त्रग्ंशदक्षरा बृहती बार्हताः पशवो बृहत्यैवाऽस्मै पशूनव रुन्धे बृहती छन्दसाग्ं स्वाराज्यं परीयाय यस्यैता [९] उपधीयन्ते गच्छति स्वाराज्यग्ं सप्त वालखिल्याः पुरस्तादुप दधाति सप्त पश्चाथ्सप्त वै शीर्ष्ण्याः प्राणाद्वाववाञ्चौ प्राणा नाग्ं सवीर्यत्वाय मूर्धाऽसि राडिति पुरस्तादुप दधाति यन्त्री राडिति पश्चात्प्राणानेवाऽस्मै समीचो दधाति॥[१०]

*अश्वमुप पुरस्तादुप बार्हता एताश्चतुस्त्रग्ंशच्च॥5.3.2॥*

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता अक्ष्णयास्तोमीया अपश्यन्ता अन्यथाऽनूच्यान्यथोपाऽदधत तदसुरा नाऽन्ववायन्ततो देवा अभवन्पराऽसुरा यदक्ष्णयास्तोमीया अन्यथाऽनूच्याऽन्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्याशुस्त्रिवृदिति पुरस्तादुप दधाति यज्ञमुखं वै त्रिवृ– [११] द्यज्ञमुखमेव पुरस्ताद्वि यातयति व्योम सप्तदश इति दक्षिणतोऽन्नं वै व्योमाऽन्नग्ं सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेऽनान्नमद्यते धरुण एकविग्ंश इति पश्चात्प्रतिष्ठा वा एकविग्ंशः प्रतिष्ठित्यै भान्तः पञ्चदश इत्युत्तरत ओजो वै भान्त ओजः पञ्चदश ओज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति प्रतूर्तिरष्टादश इति पुरस्ता– [१२] दुप दधाति द्वौ त्रिवृतावभिपूर्वं यज्ञमुखे वि यातयत्यभिवर्तः सविग्ंश इति दक्षिणतोऽन्नं वा अभिवर्तोऽन्नग्ं सविग्ंशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनाऽन्नमद्यते वचो द्वाविग्ंश इति पश्चाद्यद्विग्ंशतिर्द्वे तेन विराजौ यद्द्वे प्रतिष्ठा तेन विराजोरेवाऽभिपूर्वमन्नाद्ये प्रति तिष्ठति तपो नवदश

इत्युत्तरतस्तस्माथ्सव्यो [१३] हस्तयोस्तपस्वितरो योनिश्चतुर्विग्ंश इति पुरस्तादुप दधाति चतुर्विग्ंशत्यक्षरा गायत्री गायत्री यज्ञमुखं यज्ञमुखमेव पुरस्ताद्वि यातयति गर्भाः पञ्चविग्ंश इति दक्षिणतोऽन्नं वै गर्भा अन्नं पञ्चविग्ंशोन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनाऽन्नमद्यत ओजस्त्रिणव इति पश्चादिमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठति सं भरणस्त्रयोविग्ंश इ- [१४] त्युत्तरतस्तस्माथ्सव्यो हस्तयोः सं भार्यतरः क्रतुरेकत्रिग्ंश इति पुरस्तादुप दधाति वाग्वै क्रतुर्यज्ञमुखं वाग्यज्ञमुखमेव पुरस्ताद्वि यातयति ब्रध्नस्य विष्टपं चतुस्त्रिग्ंश इति दक्षिणतोऽसौ वा आदित्यो ब्रध्नस्य विष्टपं ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः प्रतिष्ठा त्रयस्त्रिग्ंश इति पश्चात्प्रतिष्ठित्यै नाकः षट्त्रग्ंश इत्युत्तरतः सुवर्गो वै लोको नाकः सुवर्गस्य लोकस्य समष्ट्यै॥[१५]

*वै त्रिवृदिति पुरस्ताथ्सव्यस्त्रयोविग्ंश इति सुवर्गो वै पञ्च च॥5.3.3॥*

*आशुर्व्योम धरुणो भान्तः प्रतूर्तिरभिवर्तो वर्चस्तपो योनिर्गर्भा ओजस्संभरणः क्रतुर्ब्रध्नस्य प्रतिष्ठा नाकष्षोडश॥*

अग्नेर्भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वा अग्निर्यज्ञमुखं दीक्षा यज्ञमुखं ब्रह्म यज्ञमुखं त्रिवृद्यज्ञमुखमेव पुरस्ताद्वि यातयति नृचक्षसां भागोऽसीति दक्षिणतः शुश्रुवाग्ंसो वै नृचक्षसोऽन्नं धाता जातायैवाऽस्मा अन्नमपि दधाति तस्माज्जातोऽन्नमत्ति जनित्रग्ग्ं स्पृतग्ं सप्तदशः स्तोम इत्याहाऽन्नं वै जनित्र- [१६] मन्नग्ं सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनाऽन्नमद्यते मित्रस्य भागोऽसीति पश्चात्प्राणो वै मित्रोऽपानो वरुणः प्राणापानावेवाऽस्मिन्दधाति दिवो वृष्टिर्वाताः स्पृता

एकविग्ंशः स्तोम इत्याह प्रतिष्ठा वा एकविग्ंशः प्रतिष्ठित्या इन्द्रस्य भागोऽसीत्युत्तरत ओजो वा इन्द्र ओजो विष्णुरोजः क्षत्रमोजः पञ्चदश [१७] ओज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति वसूनां भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वै वसवो यज्ञमुखग्ं रुद्रा यज्ञमुखं चतुर्विग्ंशो यज्ञमुखमेव पुरस्ताद्धि यातयत्यादित्यानां भागोऽसीति दक्षिणतोऽन्नं वा आदित्या अन्नं मरुतोऽन्नं गर्भा अन्नं पञ्चविग्ंशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनाऽन्नमद्यतेऽदित्यै भागो- [१८] ऽसीति पश्चात्प्रतिष्ठा वा अदितिः प्रतिष्ठा पूषा प्रतिष्ठा त्रिणवः प्रतिष्ठित्यै देवस्य सवितुर्भागोऽसीत्युत्तरतो ब्रह्म वै देवः सविता ब्रह्म बृहस्पतिर्ब्रह्म चतुष्टोमो ब्रह्मवर्चसमेवोत्तरतो धत्ते तस्मादुत्तरोऽर्धो ब्रह्मवर्चसितरः सावित्रवती भवति प्रसूत्यै तस्माद्ब्राह्मणानामुदीची सनिः प्रसूता धर्त्रश्चतुष्टोम इति पुरस्तादुप दधाति यज्ञमुखं वै धर्त्रो [१९] यज्ञमुखं चतुष्टोमो यज्ञमुखमेव पुरस्ताद्धि यातयति यावानां भागोऽसीति दक्षिणतो मासा वै यावा अर्धमासा अयावास्तस्माद्दक्षिणावृतो मासा अन्नं वै यावा अन्नम्प्रजा अन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यत ऋभूणां भागोऽसीति पश्चात्प्रतिष्ठित्यै विवर्तोऽष्टाचत्वारिग्ंश इत्युत्तरतोऽनयोर्लोकयोः सवीर्यत्वाय तस्मादिमौ लोकौ समावद्वीर्यौ [२०] यस्य मुख्यवतीः पुरस्तादुपधीयन्ते मुख्य एव भवत्याऽस्य मुख्यो जायते यस्याऽन्नवतीर्दक्षिणतोऽत्त्यन्नमाऽस्याऽन्नादो जायते यस्य प्रतिष्ठावतीः पश्चात्प्रत्येव तिष्ठति यस्यौजस्वतीरुत्तरत ओजस्व्येव भवत्याऽस्यौजस्वी जायतेऽर्को वा एष यदग्निस्तस्यैतदेव स्तोत्रमेतच्छस्त्रं यदेषा विधा [२१] विधीयतेऽर्क एव तदर्क्यमनु वि धीयतेऽत्यन्नमाऽस्याऽन्नादो जायते यस्यैषा विधा विधीयते य उ चैनामेवं वेद सृष्टीरुप दधाति यथासृष्टमेवाऽव रुन्धे न वा इदं दिवा

न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरपश्यन्ता उपाऽदधत ततो वा इदं व्यौच्छद्यस्यैता उपधीयन्ते व्येवाऽस्मा उच्छत्यथो तम एवाऽप हते॥[२२]

*वै जनित्रं पञ्चदशोऽदित्यै भागो वै धर्त्रस्समावद्वीर्यौ विधा ततो वा इदं चतुर्दश च॥5.3.4॥*

*अग्नेर्नृचक्षसां जनित्रं मित्रस्येन्द्रस्य वसूनामादित्यानामदित्यै देवस्य सवितुस्सावित्रवती धर्त्रौ यावानामृभूणां विवर्तश्चतुर्दश॥*

अग्ने जातान्प्र णुदा नः सपत्नानिति पुरस्तादुप दधाति जातानेव भ्रातृव्यान्प्र णुदते सहसा जातानिति पश्चाज्जनिष्यमाणानेव प्रति नुदते चतुश्चत्वारिग्ं्शः स्तोम इति दक्षिणतो ब्रह्मवर्चसं वै चतुश्चत्वारिग्ं्शो ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः षोडश स्तोम इत्युत्तरत ओजो वै षोडश ओज एवोत्तरतो धत्ते तस्मा- [२३] दुत्तरतोऽभिप्रयायी जयति वज्रो वै चतुश्चत्वारिग्ं्शो वज्रः षोडशो यदेते इष्टके उपदधाति जातागं्श्चैव जनिष्यमाणागं्श्च भ्रातृव्यान्प्रणुद्य वज्रमनु प्र हरति स्तृत्यै पुरीषवतीं मध्य उप दधाति पुरीषं वै मध्यमात्मनः सात्मानमेवाऽग्निं चिनुते सात्माऽमुष्मिँल्लोके भवति य एवं वेदैता वा असपत्ना नामेष्टका यस्यैता उपधीयन्ते [२४] नाऽस्य सपत्नो भवति पशुर्वा एष यदग्निर्विराज उत्तमायां चित्यामुप दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात्पशुमानुत्तमां वाचं वदति दशदशोऽप दधाति सवीर्यत्वायाक्ष्णयोप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यानि वै छन्दागं्सि सुवर्ग्याण्यासन्तैर्देवाः सुवर्गं लोकमायन्तेनर्षयो [२५] ऽश्राम्यन्ते तपोऽतप्यन्त तानि तपसाऽपश्यन्तेभ्य एता इष्टका निरमिमतेवश्छन्दो वरिवश्छन्द इति ता उपाऽदधत ताभिर्वै ते सुवर्गं लोकमायन्

यदेता इष्टका उपदधाति यान्येव छन्दाग्ंसि सुवर्ग्याणि तैरेव यजमानः सुवर्गं लोकमेति यज्ञेन वै प्रजापतिः प्रजा असृजत ताः स्तोमभागैरेवाऽसृजत य- [२६] थ्स्तोमभागा उपदधाति प्रजा एव तद्यजमानः सृजते बृहस्पतिर्वा एतद्यज्ञस्य तेजः समभरद्यथ्स्तोमभागा यथ्स्तोमभागा उपदधाति सतेजसमेवाऽग्निं चिनुते बृहस्पतिर्वा एतां यज्ञस्य प्रतिष्ठामपश्यद्यथ्स्तोमभागा यथ्स्तोमभागा उपदधाति यज्ञस्य प्रतिष्ठित्यै सप्तसप्तोप दधाति सवीर्यत्वाय तिस्त्रो मध्ये प्रतिष्ठित्यै॥[२७]

*उत्तरतो धत्ते तस्मादुपधीयस्त ऋषयोऽसृजत यत्त्रिचत्वारिग्ंशच्च॥5.3.5॥*

रश्मिरित्येवाऽऽदित्यमसृजत प्रेतिरिति धर्ममन्वितिरिति दिवग्ं सन्धिरित्यन्तरिक्षं प्रतिधिरिति पृथिवीं विष्टम्भ इति वृष्टिं प्रवेत्यहरनुवेति रात्रिमुशिगिति वसून्प्रकेत इति रुद्रान्थ्सुदीतिरित्यादित्यानोज इति पितॄग् स्तन्तुरिति प्रजाः पृतनाषाडिति पशून्रेवदित्योषधीरभिजिदसि युक्तग्रावे- [२८] न्द्राय त्वेन्द्रं जिन्वेत्येव दक्षिणतो वज्रं पर्यौहदभिजित्यै ताः प्रजा अपप्राणा असृजत तास्वधिपतिरसीत्येव प्राणमदधाद्यन्तेत्यपानग्ं सग्ंसर्प इति चक्षुर्वयोधा इति श्रोत्रं ताः प्रजाः प्राणतीरपानतीः पश्यन्तीः शृण्वतीर्न मिथुनी अभवन्तासु त्रिवृदसीत्येव मिथुनमदधात्ताः प्रजा मिथुनी [२९] भवन्तीर्न प्राऽजायन्त ताः सग्ंरोहोऽसि नीरोहोऽसीत्येव प्राऽजनयत्ताः प्रजाः प्रजाता न प्रत्यतिष्ठन्ता वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्येवैषु लोकेषु प्रत्यस्थापयद्यदाह वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीति प्रजा एव प्रजाता एषु लोकेषु प्रति ष्ठापयति सात्माऽन्तरिक्षग्ं रोहति सप्राणोऽमुष्मिँल्लोके प्रति तिष्ठत्यव्यर्धुकः प्राणापानाभ्यां भवति य एवं वेद॥[३०]

युक्तग्रावा प्रजा मिथुन्यन्तरिक्षं द्वादश च॥5.3.6॥

नाकसद्भिर्वै देवाः सुवर्गं लोकमायन्तन्नाकसदां नाकसत्त्वं यन्नाकसद उपदधाति नाकसद्भिरेव तद्यजमानः सुवर्गं लोकमेति सुवर्गो वै लोको नाको यस्यैता उपधीयन्ते नाऽस्मा अकं भवति यजमानायतनं वै नाकसदो यन्नाकसद उपदधात्यायतनमेव तद्यजमानः कुरुते पृष्ठानां वा एतत्तेजः सं भृतं यन्नाकसदो यन्नाकसद [३१] उपदधाति पृष्ठानामेव तेजोऽव रुन्धे पञ्चचोडा उप दधात्यप्सरस एवैनमेता भूता अमुष्मिँल्लोक उप शेरेऽथो तनूपानीरेवैता यजमानस्य यं द्विष्यात्तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्छत्युत्तरा नाकसद्भ्य उप दधाति यथा जायामानीय गृहेषु निषादयति तादृगेव तत् [३२] पश्चात्प्राचीमुत्तमामुप दधाति तस्मात्पश्चात्प्राची पत्न्यन्वास्ते स्वयमातृण्णां च विकर्णीं चोत्तमे उप दधाति प्राणो वै स्वयमातृण्णाऽऽयुर्विकर्णी प्राणं चैवायुऽश्च प्राणानामुत्तमौ धत्ते तस्मात्प्राणश्चायुऽश्च प्राणानामुत्तमौ नाऽन्यामुत्तरामिष्टकामुप दध्याद्यदन्यामुत्तरामिष्टकामुपदध्यात्पशूनां [३३] च यजमानस्य च प्राणं चाऽऽयुश्चाऽपि दध्यात्तस्मान्नाऽन्योत्तरेष्टकोपधेया स्वयमातृण्णाऽमुप दधात्यसौ वै स्वयमातृण्णाऽमूमेवोप धत्तेऽश्वमुप घ्रापयति प्राणमेवाऽस्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाऽग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुथ्सृष्ट्या अथो सुवर्गस्य लोकस्याऽनुख्यात्या एषा वै देवानां विक्रान्तिर्यद्विकर्णी यद्विकर्णीमुपदधाति देवानामेव वि क्रान्तिमनु विक्रमत उत्तरत उप दधाति तस्मादुत्तरतउपचारोऽग्निर्वायुमती भवति समिद्ध्यै॥[३४]

*संभृतं यन्नाकसदो यन्नाकसदन्तत्पशूनामेषा वै द्वाविग्ंशतिश्च॥5.3.7॥*

छन्दाग्स्युप दधाति पशवो वै छन्दाग्ंसि पशूनेवाऽव रुन्धे छन्दाग्ंसि वै देवानां वामं पशवो वाममेव पशूनव रुन्ध एताग्ं ह वै यज्ञसेनश्चैत्रियायणश्चितिं विदाञ्चकार तया वै स पशूनवाऽरुन्ध यदेतामुपदधाति पशूनेवाऽव रुन्धे गायत्रीः पुरस्तादुप दधाति तेजो वै गायत्री तेज एव [३५] मुखतो धत्ते मूर्धन्वतीर्भवन्ति मूर्धानमेवैनग्ं समानानां करोति त्रिष्टुभ उप दधातीन्द्रियं वै त्रिष्टुगिन्द्रियमेव मध्यतो धत्ते जगतीरुप दधाति जागता वै पशवः पशूनेवाऽव रुन्धेऽनुष्टुभ उप दधाति प्राणा वा अनुष्टुप्प्राणानामुथ्सृष्ट्यै बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि छन्दाग्ंस्युप दधाति विषुरूपा वै पशवः पशव- [३६] श्छन्दाग्ंसि विषुरूपानेव पशूनव रुन्धे विषुरूपमस्य गृहे दृश्यते यस्यैता उपधीयन्ते य उ चैना एवं वेदाऽतिच्छन्दसमुप दधात्यतिच्छन्दा वै सर्वाणि छन्दाग्ंसि सर्वेभिरेवैनं छन्दोभिश्चिनुते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा यदतिच्छन्दसमुपदधाति वर्ष्मैवैनग्ं समानानां करोति द्विपदा उप दधाति द्विपाद्यजमानः प्रतिष्ठित्यै॥[३७]

*तेज एव पशवः पशवो यजमान एकं च॥5.3.8॥*

सर्वाभ्यो वै देवताभ्योऽग्निश्चीयते यथ्सयुजो नोपदध्याद्देवता अस्याऽग्निं वृञ्जीरन् यथ्सयुज उपदधात्यात्मनैवैनग्ं सयुजं चिनुते नाऽग्निना व्यृध्यतेऽथो यथा पुरुषः स्नावभिः सन्तत एवमेवैताभिरग्निः सन्ततोऽग्निना वै देवाः सुवर्गं लोकमायन्ता अमूः कृत्तिका अभवन् यस्यैता उपधीयन्ते सुवर्गमेव लोकमेति [३८] गच्छति

प्रकाशं चित्रमेव भवति मण्डलेष्टका उप दधातीमे वै लोका मण्डलेष्टका इमे खलु वै लोका देवपुरा देवपुरा एव प्र विशति नाऽऽर्तिमार्छत्यग्निं चिक्यानो विश्वज्योतिष उप दधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो प्राणानेवैता यजमानस्य दाधृत्येता वै देवताः सुवर्ग्यास्ता एवाऽन्वारभ्य सुवर्गं लोकमेति॥[३९]

*सुवर्गमेव ता एव चत्वारि च॥5.3.9॥*

वृष्टिसनीरुप दधाति वृष्टिमेवाऽव रुन्धे यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारग्ं सादयति तस्माथ्सर्वानृतून् वर्षति पुरोवातसनिरसीत्याहैतद्वै वृष्ट्यै रूपग्ं रूपेणैव वृष्टिमव रुन्धे संयानीभिर्वै देवा इमाँल्लोकान्थ्समयुस्तथ्संयानीनाग्ं संयानित्वं यथ्संयानीरुपदधाति यथाऽप्सु नावा संयात्येव- [४०] मेवैताभिर्यजमान इमाँल्लोकान्थ्सं याति प्लवो वा एषोऽग्नेर्यथ्संयानीर्यथ्संयानीरुपदधाति प्लवमेवैतमग्नय उप दधात्युत यस्यैतासूपहितास्वापोऽग्निग्ं हरन्त्यहृत एवाऽस्याऽग्निरादित्येष्टका उप दधात्यादित्या वा एतं भूत्यै प्रति नुदन्ते योऽलं भूत्यै सन्भूतिं न प्राप्नोत्यादित्या [४१] एवैनं भूतिं गमयन्त्यसौ वा एतस्याऽऽदित्यो रुचमा दत्ते योऽग्निं चित्वा न रोचते यदादित्येष्टका उपदधात्यसाऽवेवास्मिन्नादित्यो रुचं दधाति यथाऽसौ देवानाग्ं रोचत एवमेवैष मनुष्याणाग्ं रोचते घृतेष्टका उप दधात्येतद्वा अग्नेः प्रियं धाम यद्घृतं प्रियेणैवैनं धाम्ना समर्धय- [४१] त्यथो तेजसाऽनुपरिहारग्ं सादयत्यपरिवर्गमेवाऽस्मिन्तेजो दधाति प्रजापतिरग्निमचिनुत स यशसा व्यार्ध्यत स एता यशोदा अपश्यत्ता उपाऽधत्त ताभिर्वै स यश आत्मन्नधत्त यद्यशोदा उपदधाति यश एव ताभिर्यजमान आत्मन्धत्ते पञ्चोप दधाति पाङ्क्तः पुरुषो

यावानेवपुरुषस्तस्मिन् यशो दधाति॥[४२]

*एवं प्राप्नोत्यादित्या अर्धयत्येकान्न पञ्चाशच्च॥5.3.10॥*

देवासुराः संयत्ता आसन्कनीयाग्ंसो देवा आसन्भूयाग्ंसोऽसुरास्ते देवा एता इष्टका अपश्यन्ता उपाऽदधत भूयस्कृदसीत्येव भूयाग्ंसोऽभवन्वनस्पतिभिरोषधीभिर्वरिवस्कृदसीतीमामजयन्प्राच्यसीति प्राचीं दिशमजयन्नूर्ध्वाऽसीत्यमूमजयन्नन्तरिक्षसदस्यन्तरिक्षे सीदेत्यन्तरिक्षमजयन्ततो देवा अभव- [४४] न्पराऽसुरा यस्यैता उपधीयन्ते भूयानेव भवत्यभीमाँल्लोकाञ्जयति भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यप्सुषदसि श्येनसदसीत्याहैतद्वा अग्ने रूपग्ं रूपेणैवाऽग्निमव रुन्धे पृथिव्यास्त्वा द्रविणे सादयामीत्याहेमानेवैताभिर्लोकान्द्रविणावतः कुरुत आयुष्या उप दधात्यायुरेवा- [४५] ऽस्मिन्दधात्यग्ने यत्ते परग्ं हृन्नामेत्याहैतद्वा अग्नेः प्रियं धाम प्रियमेवाऽस्य धामोपाऽप्नोति तावेहि सग्ं रभावहा इत्याह व्येवैनेन परि धत्ते पाञ्चजन्येष्वप्येध्यग्न इत्याहैष वा अग्निः पाञ्चजन्यो यः पञ्चचितीकस्तस्मादेवमाहर्तव्या उप दधात्येतद्वा ऋतूनां प्रियं धाम यदृतव्या ऋतूनामेव प्रियं धामाऽव रुन्धे सुमेक इत्याह संवथ्सरो वै सुमेकः संवथ्सरस्यैव प्रियं धामोपाऽप्नोति॥[४६]

*अभवन्नायुरेवर्तव्या उप षड्विग्ंशतिश्च॥5.3.11॥*

प्रजापतेरक्ष्यश्वयत्तत्पराऽपतत्तदश्वोऽभवद्यदश्वयत्तदऽश्वस्याऽश्वत्वं तद्देवा अश्वमेधेनैव

प्रत्यदधुरेष वै प्रजापतिग्ं सर्वं करोति योऽश्वमेधेन यजते सर्व एव भवति सर्वस्य वा एषा प्रायश्चित्तिः सर्वस्य भेषजग्ं सर्वं वा एतेन पाप्मानं देवा अतरन्नपि वा एतेन ब्रह्महत्यामतरन्थ्सर्वं पाप्मानं [४७] तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदोत्तरं वै तत्प्रजापतेरक्ष्यश्वयत्तस्मादश्वस्योत्तरतोऽव द्यन्ति दक्षिणतोऽन्येषां पशूनां वैतसः कटो भवत्यप्सुयोनिर्वा अश्वोऽप्सुजो वैतसः स्व एवैनं योनौ प्रति ष्ठापयति चतुष्टोमः स्तोमो भवति सर वा अश्वस्य सक्थ्याऽवृहत्तद्देवाश्चतुष्टोमेनैव प्रत्यदधुर्यच्चतुष्टोम स्तोमो भवत्यश्वस्य सर्वत्वाय॥ [४८]

*सर्वं पाप्मानमवृहद्द्वादशच॥**5.3.12**॥*

*उथ्सन्न यज्ञ इन्द्राग्नी देवा वा अक्ष्णया स्तोमीया अग्नेर्भागोऽस्यग्ने जातान् रश्मिरिति नाकसद्भिश्छन्दाग्ंसि सर्वाभ्यो वृष्टिसनीर्देवासुराः कनीयाग्ंसः प्रजापतेरक्षि द्वादश॥**12**॥*

*उथ्सन्नयज्ञो देवा वै यस्य मुख्यवतीर्नाक सद्भिरेवैताभिरष्टाचत्वारिग्ंशत्॥४८॥*

*उथ्सन्नयज्ञः सर्वत्वाय॥*

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति पञ्चम काण्डे तृतीयः प्रश्नः॥